# Svatmaprakashika

# स्वात्मप्रकाशिका

## Document Information

Text title : Svatmaprakashika

File name : svatmaprakashika.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Nov. 9, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# स्वात्मप्रकाशिका

॥ श्रीः ॥

॥ स्वात्मप्रकाशिका ॥

जगत्कारणमज्ञानमेकमेव चिदन्वितम्।
एक एव मनः साक्षी जानात्येवं जगत्त्रयम्॥ १ ॥

विवेकयुक्तबुध्याहं जानाम्यात्मानमद्वयम्।
तथापि बन्धमोक्षादिव्यवहारः प्रतीयते॥ २ ॥

विवर्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा।
इति संशयपाशेन बद्धोऽहं छिन्धि संशयम्॥ ३ ॥

एवं शिष्यवचः श्रुत्वा गुरुराहोत्तरं स्फुटम्।
नाज्ञानं न च बुद्धिश्च न जगन्न च साक्षिता॥ ४ ॥

गन्धमोक्षादयः सर्वे कृताः सत्येऽद्वये त्वयि।
भातीत्युक्ते जगत्सर्वं सद्रूपं ब्रह्म तद्भवेत्॥ ५ ॥

सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम्।
प्रपञ्चाधाररूपेण वर्तते तज्जगन्न हि॥ ६ ॥

यथेक्षुमभिसंव्याप्य शर्करा वर्तते तथा।
आश्चर्यब्रह्मरूपेण त्वं व्याप्तोऽसि जगत्त्रयम्॥ ७ ॥

मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत्।
जगत्त्रयमिदं सर्वं चिन्मात्रं सुविचारतः॥ ८ ॥

ब्रह्मादिस्तम्बपर्यन्ताः प्राणिनस्त्वयि कल्पिताः।
बुद्बुदादितरङ्गान्ता विकाराः सागरे यथा॥ ९ ॥

तरङ्गत्वं ध्रुवं सिन्धुर्न वाञ्छति यथा तथा।
विषयानन्दवाञ्छा ते महदानन्दरूपतः॥ १० ॥

पिष्टं व्याप्य गुडं यद्वन्माधुर्यं न हि वाञ्छति।
पूर्णानन्दो जगद्व्याप्य तदानन्दं न वाञ्छति॥ ११ ॥

दारिद्र्याशा यथा नास्ति संपन्नस्य तथा तव।
ब्रह्मानन्दनिमग्नस्य विषयाशा न संभवेत्॥ १२ ॥

विषं दृष्ट्वामृतं दृष्ट्वा विषं त्यजति बुद्धिमान्।
आत्मानमपि दृष्ट्वा त्वं त्यजानात्मानमादरात्॥ १३ ॥

घटावभासको भानुर्घटनाशे न नश्यति।
देहावभासकः साक्षी देहनाशे न नश्यति॥ १४ ॥

निराकारं जगत्सर्वं निर्मलं सच्चिदात्मकम्।
द्वैताभावात्कथं कस्माद्भयं पूर्णस्य मे वद॥ १५ ॥

ब्रह्मादिकं जगत्सर्वं त्वय्यानन्दे प्रकल्पितम्।
त्वय्येव लीनं जगत्त्वं कथं लीयसे वद॥ १६ ॥

न हि प्रपञ्चो न हि भूतजातं
न चेन्द्रियं प्राणगणो न देहः।
न बुद्धिचित्तं न मनो न कर्ता
ब्रह्मैव सत्यं परमात्मरूपम्॥ १७ ॥

सर्वं सुखं विद्धि सुदुःखनाशा-
त्सर्वं च सद्रूपमसत्यनाशात्।
चिद्रूपमेव प्रतिभानयुक्तं
तस्मादखण्डं परमात्मरूपम्॥ १८ ॥

चिदेव देहस्तु चिदेव लोका-
श्चिदेव भूतानि चिदिन्द्रियाणि।
कर्ता चिदन्तःकरणं चिदेव
चिदेव सत्यं परमार्थरूपम्॥ १९ ॥

न मे बन्धो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः।
मायामात्रविलासो हि मायातीतोऽहमद्वयः॥ २० ॥

राज्यं करोतु विज्ञानी भिक्षामटतु निर्भयः।
दोषैर्न लिप्यते शुद्धः पद्मपत्रमिवाम्भसा॥ २१ ॥

पुण्यानि पापकर्माणि स्वप्नगानि न जाग्रति।
एवं जाग्रत्पुण्यपापकर्माणि न हि मे प्रभोः ॥ २२ ॥

कायः करोतु कर्माणि वृथा वागुच्यतामिह।
राज्यं ध्यायतु वा बुद्धिः पूर्णस्य मम का क्षतिः ॥ २३ ॥

प्राणाश्चरन्तु तद्धर्मैः कामैर्वा हन्यतां मनः।
आनन्दामृतपूर्णस्य मम दुःखं कथं भवेत् ॥ २४ ॥

आनन्दाम्बुधिमग्नोऽसौ देही तत्र न दृश्यते।
लवणं जलमध्यस्थं यथा तत्र लयं गतम् ॥ २५ ॥

इन्द्रियाणि मनः प्राणा अहंकारः परस्परम्।
जाड्यसंगतिमुत्सृज्य मग्ना मयि चिदर्णवे ॥ २६ ॥

आत्मानमञ्जसा वेद्मि त्वज्ञानं प्रपलायितम्।
कर्तृत्वमद्य मे नष्टं कर्तव्यं वापि न क्वचित् ॥ २७ ॥

चिदमृतसुखराशौ चित्तफेनं विलीनं
क्षयमधिगत एव वृत्तिचञ्चत्तरङ्गः।
स्तिमितसुखसमुद्रो निर्विचेष्टः सुपूर्णः
कथमिह मम दुखं सर्वदैकोऽहमस्मि ॥ २८ ॥

आनन्दरूपोऽहमखण्डबोधः
परात्परोऽहं घनचित्प्रकाशः।
मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥ २९ ॥

अस्थिमांसपुरीषान्त्रचर्मलोमसमन्वितः।
अन्नादः स्थूलदेहः स्यादतोऽहं शुद्धचिद्घनः ॥ ३० ॥

स्थूलदेहाश्रिता एते स्थूलाद्भिन्नस्य मे न हि।
लिङ्गं जडात्मकं नाहं चित्स्वरूपोऽहमद्वयः ॥ ३१ ॥

क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः।
लिङ्गदेहाश्रिता ह्येते नैवालिङ्गस्य मे विभोः ॥ ३२ ॥

अनाद्यज्ञानमेवात्र कारणं देहमुच्यते।

नाहं कारणदेहोऽपि स्वप्रकाशो निरञ्जनः ॥ ३३ ॥

जडत्वप्रियमोदत्वधर्माः कारणदेहगाः ।
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः ॥ ३४ ॥

जीवाद्भिन्नः परेशोऽस्ति परेशत्वं कुतस्तव ।
इत्यज्ञजनसंवादो विचारः क्रियतेऽधुना ॥ ३५ ॥

अधिष्ठानं चिदाभासो बुद्धिरेतत्त्रयं यदा ।
अज्ञानादेकवद्भाति जीव इत्युच्यते तदा ॥ ३६ ॥

अधिष्ठानं न जीवः स्यात्प्रत्येकं निर्विकारतः ।
अवस्तुत्वाच्चिदाभासो नास्ति तस्य च जीवता ॥ ३७ ॥

प्रत्येकं जीवता नास्ति बुद्धेरपि जडत्वतः ।
जीव आभासकूटस्थबुद्धित्रयमतो भवेत् ॥ ३८ ॥

मायाभासो विशुद्धात्मा त्रयमेतन्महेश्वरः ।
मायाभासोऽप्यवस्तुत्वात्प्रत्येकं नेश्वरो भवेत् ॥ ३९ ॥

पूर्णत्वान्निर्विकारत्वाद्विशुद्धत्वान्महेश्वरः ।
जडत्वहेतोर्मायायामीश्वरत्वं नु दुर्घटम् ॥ ४० ॥

तस्मादेतत्त्रयं मिथ्या तदर्थौ नेश्वरो भवेत् ।
इति जीवेश्वरौ भातः स्वाज्ञानान्न हि वस्तुतः ॥ ४१ ॥

घटाकाशमठाकाशौ महाकाशे प्रकल्पितौ ।
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ॥ ४२ ॥

मायातत्कार्यविलये नेश्वरत्वं च जीवता ।
ततः शुद्धचिदेवाहं चिद्व्योमनिरुपाधितः ॥ ४३ ॥

सत्यचिद्घनमनन्तमद्वयं
सर्वदृश्यरहितं निरामयम् ।
यत्पदं विमलमद्वयं शिवं
तत्सदाहमिति मौनमाश्रये ॥ ४४ ॥

पूर्णमद्वयमखण्डचेतनं
विश्वभेदकलनादिवर्जितम् ।
अद्वितीयपरसंविदंशकं

तत्सदाहमिति मौनमाश्रये॥ ४५॥

जन्ममृत्युसुखदुःखवर्जितं
जातिनीतिकुलगोत्रदूरगम्।
चिद्विवर्तजगतोऽस्य कारणं
तत्सदाहमिति मौनमाश्रये॥ ४६॥

उलूकस्य यथा भानावन्धकारः प्रतीयते।
स्वप्रकाशे परानन्दे तमो मूढस्य भासते॥ ४७॥

यथा दृष्टिनिरोधार्तो सूर्यो नास्तीति मन्यते।
तथाज्ञानावृतो देही ब्रह्म नास्तीति मन्यते॥ ४८॥

यथामृतं विषाद्भिन्नं विषदोषैर्न लिप्यते।
न स्पृशामि जडाद्भिन्नो जडदोषान्प्रकाशयन्॥ ४९॥

स्वल्पापि दीपकणिका बहुलं नाशयेत्तमः।
स्वल्पोऽपि बोधो महतीमविद्यां शमयेत्तथा॥ ५०॥

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम।
आनन्दत्वान्न मे दुःखमज्ञानाद्भाति तत्त्रयम्॥ ५१॥

कालत्रये यथा सर्पो रज्जौ नास्ति तथा मयि।
अहंकारादि देहान्तं जगन्नास्त्यहमद्वयः॥ ५२॥

भानौ तमःप्रकाशत्वान्नाङ्गीकुर्वन्ति सज्जनाः।
तमस्तत्कार्यसाक्षीति भ्रान्तबुद्धिरहो मयि॥ ५३॥

यथा शीतं जलं वह्निसंबन्धादुष्णवद्भवेत्।
बुद्धितादात्म्यसंबन्धात्कर्तृत्वं वस्तुतो न हि॥ ५४॥

जलबिन्दुभिराकाशं न सिक्तं न च शुध्यति।
तथा गङ्गाजलेनायं न शुद्धो नित्यशुद्धतः॥ ५५॥

वृक्षोत्पन्नफलैर्वृक्षो यथा तृप्तिं न गच्छति।
मय्यध्यस्तान्नपानाद्यैस्तथा तृप्तिर्न विद्यते॥ ५६॥

स्थाणौ प्रकल्पितश्चोरः स स्थाणुत्वं न बाधते।
स्वस्मिन्कल्पितजीवश्च स्वं बाधितुमशक्यते॥ ५७॥

अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः।

विलीनाज्ञानतत्कार्ये मयि निद्रा कथं भवेत्॥ ५८॥

बुद्धेः पूर्णविकासोऽयं जागरः परिकीर्त्यते।
विकारादिविहीनत्वाज्जागरो मे न विद्यते॥ ५९॥

सूक्ष्मनाडीषु संचारो बुद्धेः स्वप्नः प्रजायते।
संचारधर्मरहिते स्वप्नो नास्ति तथा मयि॥ ६०॥

परिपूर्णस्य नित्यस्य शुद्धस्य ज्योतिषो मम।
आगन्तुकमलाभावात्किं स्नानेन प्रयोजनम्॥ ६१॥

देशाभावात्क गन्तव्यं स्थानाभावात्क वा स्थितिः।
पूर्णे मयि स्थानदेशौ कल्पितावहमद्वयः॥ ६२॥

प्राणसंचारसंशोषात्पिपासा जायते खलु।
शोषणानर्हचिद्रूपे मय्येषा जायते कथम्॥ ६३॥

नाडीषु पीड्यमानासु वाय्वग्निभ्यां भवेत्क्षुधा।
तयोः पीडनहेतुत्वात्संविद्रूपे कथं मयि॥ ६४॥

शरीरस्थितिशैथिल्यं श्वेतलोमसमन्वितम्।
जरा भवति सा नास्ति निरंशे मयि सर्वगे॥ ६५॥

योषित्क्रीडा सुखस्यान्तर्गर्वाढ्यं यौवनं किल।
आत्मानन्दे परे पूर्णे मयि नास्ति हि यौवनम्॥ ६६॥

मूढबुद्धिपरिव्याप्तं दुःखानामालयं सदा।
बाल्यं कोपनशीलान्तं न मे सुखजलाम्बुधेः॥ ६७॥

एवं तत्त्वविचाराब्धौ निमग्नानां सदा नृणाम्।
परमाद्वैतविज्ञानमपरोक्षं न संशयः॥ ६८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
स्वात्मप्रकाशिका संपूर्णा॥

*Svatmaprakashika*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*